श्रीसहजानंदाय नमो नमः ॥ अथ कविस्तत्स्वरूपवर्णनमारभते आदिक्रियाकुलकमाह अथेति अथ महाम
इसिसर्वजनोपचेनूनानंतरम् हरिः सहजानंदः दुर्गापत्तनं दुर्गसंज्ञपुरम् तस्य पतिरधीन्नास्तस्य तथोक्तस्य तन्नम
सनन्तमारभ्यस्यक्षितिं भुवं क्षयतीष्टइतिक्षितिक्षित्भूपतिस्तस्य क्षितेश्वर्येदृतिदेवादिकाद्धेतोः किंपितु कु भवना
नांसौधानां यदंतरं मध्यं तत्रस्थितात् महानंदेवाधिपतित्वात् कुत्तरूष्टोयद्गोमुत्तस्य यत्सदनं मंदिरं तस्मादतिचारूणो
सुत्कृष्टात् नितः स्वकीयोयः सौधः प्रासादस्तस्मादिति ततः अनुगाः पार्षदास्तैर्वृतो वेष्टितः सन् समितिं सभाम्

अथ दुर्गपत्तनपतेः क्षितिक्षितो हरिरुत्तमस्य भवनोंतरस्थितात् ॥ निजसौधतोनुगवृतः समाययौ समितिं महे
न्द्रसदनातिचारुणः ॥१॥ गृहिभिः श्रितां च कृतराऽनुरागिभिर्मुनिभिः सवर्णिभिरवेक्षणोत्सुकैः ॥ नरदूरसंस्थवनिता
भिरन्वितां जयनीस्वधर्मसमितिर्निजश्रिया ॥२॥ समाययौ संप्राप मंजुभाषिणी वृत्तमेतत् सजसाजगौ भवतिमं
जुभाषिणीति लक्षणात् ॥१॥ तां विशिनष्टि गृहिभिरिति बहुकृतरा इति विपुलोनुरागो गाढप्रीतिः सोऽस्ति येषां तैस्तथो
क्तैः मत्वर्थे इनिः अवेक्षणे हर्यवलोकने उत्सुकैः सोत्कंठैः वर्णिनो नैष्ठिकब्रह्मचारिणस्तैः सहितैः मुनिभिरा
त्मपरमात्ममननशीलैः साधुभिः गृहाद्दाराविद्यंते एषां ते स्तथोक्तैर्द्वितीयाश्रमिभिः पुंभिश्च श्रितां सेवितां ॥१॥

नराः पुमांसस्तेभ्यो दूरे दैन्योऽसंतिष्ठंते निषीदंतीति तथा भूतायाः वनिताः स्त्रियस्ताभिश्च अन्वितां युक्ताम् निजास्वी
यायाः श्रीस्तदाश्रितजनयश्चो चितोपचेनूनाजमान्त्रो भातयास्वधर्मसमितेः स्वधर्माश्रमसभाया जयिनीं जयतिप
राभावयतीति तां तथोक्तां न दिग्निहिपचादिभ्यो त्युणिन्प्रत्ययः इति निः रुन्नेभ्योडीवितिङीप् समितिं समाययो हरि
रिति संबंधः ॥२॥ नवेति नवास्तात्कालिकायेनीरदा मेघास्तेषां मालिः पंक्तिस्तद्वत् विलसच्छोभमानं कलेवरं मूः
र्तिर्यस्य सतथोक्तः कलिताभिघृताभिः प्रतिबन्धूकपतिपिंगला निवराणि श्रेष्ठानि च भास्कराणि भास्वन्तिवा च

नवनीरदालिविलसत्कलेवरः कलिताति बन्धुवरभास्करांबरः ॥ विलसन्निवामितपयोजसंचयः पुरुगौरबंधुरप
रागरंजितः ॥३॥ विमलेन्दुनीलललितोपलस्थलं परिभिन्नसुक्ष्मकिरणोत्करैरिव ॥ अचिरांशुकांतिपटलै
रिवाश्रितं जलदावलिप्रविलसन्नभस्तलम् ॥४॥ राणि वसनानि यस्य सतथोक्तः इसनेकपद्मबहुव्रीहिः वि
पुलेनकुलेविहितोवस्तुः स्वासिंगलेत्रिधिसमरः अतएव पुरुर्बहुर्गौरः पिंगल बंधुरश्चारुश्च यः परागः पद्म
रजस्तेन रंजितो मिश्रितः अमितानिरूपमानिया निपयोजानि पद्मानि तेषां संचयो राशिरिव विलसन् शोभमा
नः सः समाययो ॥३॥ विमलेति उदमकीर्णोघर्मदीधितिः सूर्यस्तस्य येनहुलाएवोस्त्रकामरी चयस्तैः परिभिन्नं मि

हरिसं॰ ॥२॥

श्रितम् विमलाः स्वच्छाः इंद्रनीलाः नृपमाख्या ये ज्वलिताः स्फटिका दशनपलामणयस्तेषां स्थलं भूमिस्तस्मिन् आश्रितं सर्ग॰ १३

स्त्र विद्युत्तस्याः कांतिः प्रकाशस्तस्य पटलैः समूहैः आश्रितं मिलितम् जलानिपयांसि ददतीति वर्षती तिजलद

दामे घास्तेषामालयः पंक्तयस्ताभिः प्रविलसत् शोभमानम् नभस्तलं गगनतलमिव विलसन् ससमाययौ

ध॥ परितप्तेति परितप्तं सम्यक् पुटपाकनिर्लोन्कं यज्जर्मकनकं सुवर्णं स्फवर्णकनकं हिरण्यं हेमहाटकमृतप

नीयं शातकुंभगांगेयं भर्मकर्बुरमिति समरः तस्य वराः श्रेष्ठाः याराजयो रेखास्ताभिः राजितः शोभितः स्फुरितायस

परितप्तभर्मवरराजिराजितो निकषोपलः स्फुरितकांतिमानिव॥ परभागतामिवशिखाभिराश्रितो वडवानलः

स्वविचकास दंबुधिः॥५॥ ममवीक्ष्य कालभयदायिनीं भ्रुवं न जनोयमेष्यति भियामदंतिकम्॥ इतितं विचिंत्य सर

दितिन्निवृत्तये परिगृह्यमान इव बंधनच्छलात्॥६॥ रंतीयाकांतिः शोभासा विद्यते अस्मेतितथोक्तः निकषो

पलः शाणाप्रस्तरं इव शाणस्फुविकषः कषइ समरः वडवानलस्य और्वाग्नेः शिखाभिः ज्वालाभिः परभागो

गुणोत्कर्षस्तस्य भावस्तत्तां ताम् आश्रितो मिलितः अंबुधिः समुद्रइव विचकास स्फिनोऽषेण शोभमानः सस

माययौ॥५॥ युग्मेन तच्छिरोवेष्टनं श्रियं वक्ति ममेति द्युतिमदिति कालः प्रकृतिपुरुषयोस्तिरोधानहेतुस्त ॥३॥

स्यापि भयदायिनीं पुरुषोत्तमस्य क्षितिभारभूतासत्तनेषु वक्रभ्रकुटनेक्षणं प्राकृतसर्वलयनिदानं मामपिवि

नंक्ष्यतिकिमितितस्य त्रासोसायित्री मममम भ्रुवं भृकुटीम् वीक्ष्य दृष्ट्वा अयं जनो जीववर्गः भिया भयेन मदंति

कं मत्निकटम् नैष्यति नागमिष्यति इसमुनाप्रकारेण हृदिमनसि विचिंत्य स्मृत्वा तस्य जनभयस्य निवृत्तयेवि

नाशाय बंधनमुष्णीषांशावेष्टनं तदवेच्छलो मिषस्तस्मादिव न तु शिरोवेष्टनबंधनमेव प्रयोजनं किंतु तत्तिरोधा

नमेवेसुरवेक्षातां भ्रुवम् परिगृह्यमानः संवृण्वानः मनुशिरः पटमुष्णीषं परिबिभ्रत् बिभ्राणः कथंभूतं तम् द्यु

द्युतिमन्महारजतसूत्रराजितं लसदच्छमौक्तिकदलं तं शिरःपटम्॥ अरुणं विचित्रवरपुष्पकंकणं परिबिभ्रदंत

रसदग्रनीरवरम्॥७॥ तिः कांतिर्विद्यते अस्मिंस्तत्तथाभूतं महारजतं कांचनम् चामीकरं जातरूपं महारजतकांच

ने इसमरः तस्य यानि सूत्राणि तंतूनि तैः राजितं शोभितम् पुनः कथंभूतम् लसंति शोभमाना निअच्छानि निर्म

लानि यानि मौक्तिकानि मुक्ताफलानि तेषां दलाः रेखराणि यस्मिंस्तत्तथोक्तम् पुनः कथंभूतम् अंतरं तन्मध्यं

तस्मिन् सत् शोभमानं यदग्रं प्रांतभागस्तदेव नीरवरं यस्मिंस्तत्तथोक्तम् पुनः कथंभूतम् विचित्राणि नानावि

धानि वराणि सर्वोत्तमानि च यानि पुष्पाणि कुसुमानि तेषां कंकणं निरुपवराणि यस्मिंस्तत्तथोक्तम् पुनः कथं

भूतम् अरुणं शोणवर्णम्॥६॥७

हरिसं-
॥नृ॥



कद्यांकद्या वानूपुरांतिव्रणोभमानेयद्भूतेभस्मतां वून दस्यलनामकंदरंश्रृंखलसारसनेयस्यसतथोक्तः

पदेतिपदयोः पादयोः संजितेनूपुरहिरिलेनुरमलहिरण्पस्पुटपाकनुणोधितत्वान्निर्मलकवर्णस्मनूपुरेमंजिरेयस्यस
तथोक्तः जांबूनदंत्राातकुंभंजतंभूरिभूतमपिमितिहेमः कीवेसारसनंचाथपुंस्कटनां श्रृंखलंत्रिष्विसमरः चक्रहि
रण्यम् स्वर्णहेमहिरण्पहाटकवसुस्पष्टायदंकांचनमितिहेमः तस्यय: पारिहार्यः प्रकोष्ठाभरणंवलयः कटक
श्रूमावादीयेषांमंगुलियककग्रैवेयकादीनांनामितथाभूतानिमंडनानिभूषणानियस्यसतथोक्तः आवाप
कः पारिहार्यः कटको वलयोस्त्रियामिसमरः द्युतिः कांतिर्विद्युतेयेषामितितथाभूताः मणीहामणपुन्नमा

पदसंजितामलहिरण्पनूपुरः कटिग्रालिभूत्तमलला मश्रृंखलः॥ वलकपारिहार्यवलयादिमंडनोद्युतिमन्मणी
द्युपुरटांगदप्रभः॥ ५॥ कलधौतचारुकुरुविंदनिर्मितस्फुरितोल्लसन्मकरलोलकुंडलः॥ अतिमुक्तकभंडिलक
हेमपुष्पिकारुचिरावतंसवरकर्णमंडलः॥ ६॥
यद्यौस्तथाभूतेयेपुरटस्यकनकस्यांगदेकेयूरेतयोः प्रभात्रो
भायस्यसतथोक्तः ससमाप्तये॥ ६॥ कलधौतेतिकलधौतंस्कवर्णम् चारवोरमणीयायेकुरुविंदाः पद्मराग
मणयस्तैर्निर्मितेविरचितेस्फुरितेप्रसरस्प्रभेचोल्लसती अतित्रोभमानेमकरैर्मीनाविवाकृती आकारेययो
स्तेमकराकृतिनीलोलेचंचलेचकुंडलेयस्यसतथोक्तः शाकपार्थिवादित्वाद्धकृत्नीहिसमासोत्तरपदभूत ॥३॥

तस्याकृतिशब्दस्यलोपः अतिमुक्तः पुंड्रकोमल्लिकाविशेषइतियावत् अतिमुक्तः पुंड्रकः स्माद्वासंतीमाधवी
लतेसमरः तस्यपुष्पाणिभंडिलश्चंपकः भंडिलोप्यथचांपेयश्चंपकोहेमपुष्पकइसमरः रलयोरेकत्वात् भंडि
रोपिभंडिरोभंडिलोनेतिवाचस्पतिः तस्यपुष्पाणिचशोभमाना हेमपुष्पिकापीतपुष्पवती यूथिकाच अथ
मागधीगणिकायूथिकांबष्टासापीता हेमपुष्पिकेसमरः तस्याः पुष्पाणिचसर्वत्रपुष्पमूलेषुबहुलमितिसणो
लुक् तेषांरुचिराः सुंदराअवतंसागुच्छायययोस्तेतथाभूतवरेश्रेष्ठेचमंडलेयस्यसतथोक्तः॥ ७॥ तदीयमकरा

पुरुसौकुमार्यरमणीयतोदधिस्थितमास्यचंद्रमसमीक्षितुंद्रुवत्॥ नाकुलद्वयंभृत्रामिवस्मराजतेवरलत्तालिचल
कुंडलद्वयम्॥ ८॥ जनयन्मनोनयनहर्षसंचयंकमनीयरूपममिपन्नपतांदधत्॥ अधिलोकमंगधरजातनिर्जयस्य
यस्तूनकार्मुकमदावतंडनम्॥ ९॥
द्युतिकुंडलचंचलत्वमुखेक्षितेपुर्विंत्तिवुरांणिश्रेष्ठानियानिरत्नानितैः शालते
शोभतेइतितत्तथोक्तम् चलंचंचलंकुंडलयोर्द्वयंयुग्ममस्यकुमारस्यातिकोमलस्यभावः सौकुमार्यपुरुबहुपत्तो
कुमार्यरमणीयः कमनीयस्तस्यभावस्तत्ताचतयोरुदधिः समुद्रस्तस्मिन्स्थितम् आस्यंश्रीहरिमुखमेवचंद्रमास्त
मुद्रेक्षितुंद्रष्टुमुद्रवत् धावत्नाकुलयोर्मीनयोर्द्वयमिवभृत्रामसंतमराजतेस्मशुशुभे॥ ८॥ जनयन्निति लोके

षु भुवनेष्वपि समधिलोकं सर्वेषु विष्टपेष्वपि समर्थाः अंगानि शरीराणि तेषां धराधारकाजनास्तेषां जातानि समूहास्ते
षां निर्जयः पराभवस्तेन स्मयो गर्वो यस्य स तथाभूतो यः सूनकार्मुकः पुष्पधन्वा स्मर इति यावत् तस्य यो मदो हं
कारस्तस्य खंडनं विघातकम् अत एव अभिपश्यतां सम्यगवलोकयताम् मनस्कनयनेषु चक्षुःषु चयो हर्ष
संचयो महानंदभरस्तम् जनयत् उत्पादयत् कमनीयरूपं रमणीयस्वरूपम् दधत् बिभ्रत् ससमितिसमाययौ
११ अवरीणेति अवरीणानि निःशेषतया विनष्टानि दूषणानि कामादिदोषा येभ्यस्तथाभूतानि मनांसि ये

अवरीणदूषणमनो मुनिव्रजस्मरणीयचारुचरणो विचालयन् । गमनेन निर्भरविलासशालिना विजितद्विपेंद्र
कलहंसविभ्रमः ॥१२॥ नितम्भसवर्यधुतहंससंमितव्यजनानुकूलगतिमातरिश्वना । चलदातपत्रगुलिकास्फु
रद्भिर्यमुनाप्रवाह इव चंद्रवीचिभिः ॥१३॥ शांतेति तथोक्ताः ये मुनिव्रजात्मातमपरमात्मतत्वमननशीलवृ
गिजनसमूहास्तैः स्मरणीयौ चिंतनीयौ चारू मंदरौ चरणौ पादौ विचालयन् तद्विमासं कुर्वन् निर्भरो ऽतिशयो
यो विलासो गतिचातुर्यं तेन शालिना शोभनशीलेन तेन तथोक्तेन गमनेन गत्या विजितः पराभूतो द्विपेंद्रकलहंस
योर्गजेंद्रकादंबयोर्विभ्रमो गतिचातुर्यं येन स तथोक्तः ससमितिसमाययौ ॥१२॥ नितेति नितांताः स्वकीया येभ्य ॥४॥



ताः अनुचरास्तेषां मध्ये यौ वर्यौ मुख्यौ पार्श्वदौ ताभ्यां धुते कंपिते हंसाभ्यां संमिते सदृशे ये व्यजने चामरे तयोः सं
बंधी अनुकूलामंदच्छैसच्छादिवर्जितागतिः संचारो यस्य स तथाभूतो यो मातरिश्वा वायुस्तेन तथोक्तेन धुत्वकं
पनेस्पंदातः चलंसोच्श्रमंसः आतपत्रस्यच्छत्रस्य संबंधिभिः गुलिकानां मौक्तिकानां याः शोभमानाय स्फुरद्यस्ता
भिः चिचिभिर्विधुराभस्तिभिः यमुनाप्रवाहः कालिंदीस्रोत इव राजित इति शेषः ससमितिसमाययौ ॥१३॥ ध्रुव
लक्ष्येति चामरेव्यजने च रं श्रेष्ठं यदुरसवारणमातपत्रे च कृतराव लक्ष्मानि धवलानि वृत्तानि तानि च तैस्तथोक्तैः

ध्रुवलक्ष्मचामरवरोरुसवारणैः स्फुरमुक्तमाल्यनिकरैरुपस्कृतः । स्फुरदसिताङ्गवसनैः रुदुच्छैर्जलदोयथार्क
तडिदिंद्रकार्मुकैः ॥१४॥ स्फुरदैर्दैवैर्मुक्तान्यवकीर्णानि यानि माल्यानि पुष्पाणि तेषां निकराः समूहास्तैश्च स्फु
रंति प्रसरत्प्रभानि उद्धिकानि पिंगांगानि पीतानि च यानि वसनानि वासांसि तैस्तथोक्तैश्च अर्कः सूर्यश्च
स्तडिद्विद्युच्चंद्रश्चंद्रश्च कार्मुकमिंद्रधनुश्च तैस्तथोक्तैः उडूनां नक्षत्राणां व्रजानि कराः तैश्च जलदो यथा मेघ
इव उपस्कृतो मंडितः ससमाययौ अत्रार्कं उदमीषोपमानम् तडिद्वसनोपमानम् इंदुश्छत्रोपमानम् कार्मु
कं मणिभूषणोपमानम् उडूनि माल्यनिकरोपमानम् अभूतोपमेयम् उपदाजलदस्योपरि चंद्रबिंबम् ।

तदधस्तात्सूर्यः परितमड्डनितदंतरिंद्रधनुश्च स्थिरातद्दिव्य यस्मान्तदा मज्जलदीपथाचकास्तेतथास श्री हरि
र्विरेजे हृसर्थः ॥१४॥ ललितेति विस्तृतानि प्रसृतानि अंबुसंभवानां पयोजानां नारजांसि परागा यस्मिंस्तत्तथाभू
तं कलिंदजायायमुनायाः जलं नीरं तस्य सन्निधानमंतिकं तस्मिंश्चरतिगच्छतीतितथाभूतो यो हंसो मराल
स्तस्य रोचिः प्रभेवरोचिर्यस्यतंतत्थोक्तम् रुचिरो रमणीयो यो नक्षकः करपटस्तम् ललितानि चारूणि या
न्यंगुलीयान्यूर्मिकास्तेषु विमलोपलाः शुद्धमणयस्तेषां या द्युतिः कांतिस्तया स्फुरिते प्रसरत्प्रभे त्राये॰

ललितांगुलीयविमलोपलद्युति स्फुरिते दधौ रुचिरनक्षकं नृपे ॥ विसृतांबुसंभवरजः कलिंदजाजलस॰
न्निधानचरहंसरोचिषम् ॥१५॥ अवलोक्य तं ललितवेषपेशलं जनसंचयाः सपदि संभ्रमाकुलाः ॥ अन
मन्नमन्मनसिजादिव स्मातं नमुविधुमुत्थितांम् इव मुद्रा पयोधयः ॥१६॥ पाणोदृधत ससमाप्यये ॥१५॥ अव
लोक्येति जनानां भक्तानां संचयाः समूहाः नमतां प्रणामं कुर्वतां तेषां जनानां मनसिजः कामस्तस्मादपि श्रेष्ठं तेषां
शोभाणां ललितनविधातकम् ललितः रुद्रशोभो वेषं नेपथ्यं तेन पेशलं रमणीयम् तं सहजानंदं अवलोक्य
दृष्ट्वा सपदि तत्क्षणम् संभ्रमः संवेगस्तेनाकुला आप्ताः विधुं चंद्रं अवलोक्य पयोधयः समुद्रा एव मुदा हर्षेण ॥५॥

उत्थितान् अभ्युत्थानं कृतवंतस्ततः अनमन् ववंदिरे ॥१६॥ रुरुचइति विविधं विचित्रं शिल्पिनां चित्रक्रि॰
याकुशलानां कौशलं चातुर्यं यस्मिंस्ततथोक्तम् तस्मिन् विचित्रे नानावर्णे रुचिरे रमणीये प्रोच्छ्रितच्छद॰
पर्यस्तरणं यस्मिंस्तत्तथोक्तं तस्मिन्वरं श्रेष्ठं यत् विष्टरमासनं सिंहासनमितियावत् तस्मिन् निषेदिवानुप
विष्टवान् भाष्यायां सदवसम्बुवइति निपूर्वात्सीदतेलिट तस्य क्वसुः सहजानंदः अरुणः सूर्यसूतो॰
नुरुलस्यानुजो गरुडस्तस्मिन् निषेदिवान् हरिः श्री कृष्णो मेरुगिरेः पर्वतस्य विचित्र शिखरे विविधवर्णसानु॰

रुरुचे विचित्ररुचिरोन्नतच्छदे स निषेदिवान्विविधशिल्पिकौशले ॥ वरविष्टरे हरिरिवारुणानुजे वनदो विचित्र
शिखरे गिरेर्यथा ॥१७॥ निजवक्त्रनीरजविलोललोचनभ्रमरैः समंतपरिवेष्टितोद्भवो ॥ सततैः सारच्छिमलतार
कागणैः परिपूर्ण इव शिखिनार्कशेखरः ॥१८॥ मिति निषेदिवान् वनानि जलानि ददातीति वर्धतीति वनदो मेघो यथा
तथा रुरुचे राज ॥१७॥ निजेति तत्र तस्यां महासदसि निजं स्वीयं यद्वक्त्रं मुखं तदेव नीरजं कमलं तस्मिन् विलोषे
लालोलानि सतृष्णानि लोचनानि चक्षूंष्येव भ्रमराः अलयो येषां ते तैस्तथोक्तैः स्वस्मात् जो ये ते नाभक्तास्तैस्तथो॰
क्तैः परिवेष्टितः संवृतः ससहजानंदः सारदऋतुविशेषणस्य या विमला मेघावरणरहितत्वात्स्वकान्त्यामानास्तार

कास्तासां गणास्तैः परिवेष्टितः परिपूर्णो निरोचौ विमरीचयो यस्य स तथोक्तः त्रावेरी श्रुरेराकापति शुंदुद १
वत्र भोश्रुशुभे ॥ १८ ॥ विचलदिति विचरन्निरिभ्रमत्‌ वीजनादितिभावः मृणालं पद्मविसमिव सितं धवलं च चा
रुस्कंदरं च यच्चामरयोर्व्यजनयोर्द्वयं तदंतरेण समास्थितस्तयोर्मध्ये स्थित इत्यर्थः अंतरांतरेणयुक्ते इति द्वि
तीयासहरिः सहजानंदः अभितः पतंही नु भयतया तिनी या स्फुरसरिद्धाकान्नागंगा तया वितो विष्टिएनाव्लतं
त्रांभतेद तितथोभस्य पर्यभिध्यां चेतितसिद् सर्वो भयार्थे वर्त्तमानाभ्याम्मिष्यत इसुभयार्थत्वं सुप्रूत्थे तिसमा

विचलन्मृणालसितचारुचामरद्वयमंतरेण सहरिः समास्थितः ॥ अभितः पतत्स्फुरसरिद्धिनाव्लिनः पयसां
निधेस्मजत श्रियं परम्‌ ॥ १९ ॥ वरतारहारमवलोकनोचितं स्फुरितेंदुनीलमणिसन्निभप्रभम्‌ ॥ विरराजफेन
निचयैर्वपुर्हरेः परिरब्धमंबुनामनस्वस्फुरयथा ॥ २० ॥ सः पयसां निधेः समुद्रस्य परमुत्स्कृष्टाम्‌ श्रियं अभज
नताद्दशी शोभां भजतिस्मेत्यर्थः अतएव निदर्शनासा च पयसां निधेः संभावनामात्रोक्तिः अभितः पतत्स्फुरस
रित्संबंधमूलया अ संबंधे संबंधरूपातिशयोक्त्याश्लोजीवक संयोगेन संकीर्यते इति संक्षेपः ॥ १९ ॥ संप्र
तितस्य हारश्रियमाह वरेति अत्रवलोकननिरीक्षणेन तत्रोचितं जनश्रेयो निदानत्वात्त्रिविधतापोपशमनत्वाच्च ॥६॥
यो ग्यत मम्‌ स्फुरितः प्रसरत्प्रभो यदिंदुनीलमणिः नृपाममणिस्तेन सन्निभासदृशीप्रभाशोभायस्य तत्तथोक्त
मुवरः सर्वोत्तमाः तारणांश्च द्रमौक्तिकानां हारादामानि यस्मिंस्ततथोक्तम्‌ हरेः सहजानंदस्य वपुः शरीरम्‌
फेनानामब्धिकफानां निचयाः समूहास्तैः परिरब्धं सर्वतो भिमिश्रितम्‌ अपरेनाप्यमरः अत्तांतोयमुनांभ्सा
तान्याम्नोप्यमराडम इसमरः तस्यस्वसायमुनातस्याः अंबुजलं यथा तथा विरराज ॥ २० ॥ रजनीति रजनीश्रुस्त्र
द्रुस्तस्यांशवः किरणास्तैस्तथोक्तैः अवभासितं प्रकाशितंम्‌ स्फुटानि प्रफुल्लानियानि माल्यानि पुष्पाणितैः

रजनीश्वरांशुभिरिवावभासितं स्फुटमाल्यपुष्पकृतमालजालकम्‌ ॥ स्फटिकपभेरिवतुषारशीकरैर्विकस १
स्तुमाकुसुमद्वंद्वमाश्रितम्‌ ॥ २१ ॥ विपुलतरभुजांतरस्थितश्री चरवनितस्य बभूव तस्य लक्ष्मीः ॥ प्रमुदितज
नतापरेव दिव्यासमुपगतासकलप्रतीकसंगम्‌ ॥ २२ ॥ शालं तेनशोभं तेइतितथाभूताशोभमानास्तमालास्ता १
पिच्छवृक्षास्तेषां जालं कंदृदमिवस्फटिकाधवलमणयस्तेषां प्रभाकांतिरिवप्रभायेषां तैस्तथोक्तैः तुषार
णां हिमानां शीकराः अंबुकणास्तैः शीकरोंबुकणा इसमरः शीकरोयदंसादिरितिधनपालः आश्रितं भिश्रि
तमित्यर्थः विकसितं प्रफुल्लानियानि कुसुमायात तस्याः कुसुमानि पुष्पाणितेषां द्वंद्वमिवतद्वपुर्विरराजेसनुष

ग: ॥ ३१ ॥ संवृतिसर्वजनविस्मयविधायपित्रीनंदसूनुगाश्रियमाह विपुलेति विपुलतरमतिविस्तीर्णं यत्कौस्तुभयो
र्वोऽक्षोरंतरंवक्षस्तस्मिन् स्थिता श्रीर्लक्ष्मीरेवचराश्रेष्टा वनिता स्त्री यस्यतस्यतथोक्तस्यतस्यसहजानंदस्य
प्रमुदिताहर्षंप्रापिताजननाजनसमूहोपयासातथोल्काविद्याद्योतमानासकला: समग्रा: प्रतीका: करचर
णोर: प्रभृत्यंगानितेषांसंग: संपर्कस्तमसमुपगता प्राप्ताऽतएव अपरैर्वासाधारण्येवश्रियोसैवलक्ष्मी:
स्त्रीभारमाचबभूवअत्रसहजानंदस्यतदानीमसाधारणीस्त्रीभास्मजनीतिताश्रिकोवाक्यार्थ: अत्रच

यदनन्यसद्गुणनिधानपज्जितंनलिनंललाममिषतोवपदंकृतम् ॥ कविमुक्तगोपपरिविंसतांययोप्रणतिर्ग
रीयसिमहत्त्वकारिणी ॥ ३३ ॥ श्रीनाम्नैन श्लेषमहिम्नावाच्यायाः स्त्रीभायाः प्रतीयमानयाश्रीदेव्यासहाभे
दाध्यवसायाद्विषमन्यैवलक्ष्मीरिसभेदरूपाभेदादतिशयोक्तिः ॥ ३३ ॥ यदिति यस्य सहजानंदस्य अनन्या
असाधारणायेसंत: श्रेष्ठागुणा: सद्गुणास्तेषां निधानमास्पदंपदंघ्रिस्तेनजितंपराभूतम् नलिनंप
द्मम् ललामस्य चिह्नस्य मिषेणच्छलेन पदंघ्रिस्तगतंवप्राप्तमिवस्थितंसत् द्वितीयाश्रितेत्यादिनासमासः
नवापद्यातथैवेवंसाम्येइसमरः वंप्रवेतसिविज्ञानीयादिवार्थेतुनदव्ययमितिमेदिनीसंमतिश्रयथा ॥ ७ ॥



केनचिज्जनेनकश्चिद्विजितस्तत्कृतिकारक्षमयोगमनुपलभमानस्तत्पादयोर्निपतति तद्वदिदमपितच्चर
णश्रीयाविजितंसत्तदाश्रयविधित्सयातदंघ्रिनिपतितमिवसुत्प्रेक्षा कवयोनानाविधप्रबंधकुशला: क
वि: शुक्रेचदक्षेचकवि: स्यात्काव्यकर्त्तरीतिविश्व: मुक्ता: अखिलमायिकवस्तुत्यक्तारःभागवतधर्मानु
ष्ठानेनापीत्यत्रलभावमुपगताश्चतेषां गेयंगातुमर्हंपरिविंसमभिधेयंनयोर्भावस्तत्तातम् ययोप्राप्य तथा
ह्रिमतिशयेनगुरु: श्रेष्ठ: नानागुणगणै: सर्वोत्कृष्टजनइतियावत् तस्मिन् प्रणतिरभिवंदनम् महत्त्वका

अनिवार्यमंगुलिरुचानुरंजितोनिविडंनिरानायतियन्नखवत्तमः ॥ अगतोनुरागमपिनक्षमोविधुर्ग
नस्थितोपियदपोहितुंक्षमन् ॥ ३४ ॥ रिणीगुरुत्वविधायिनी सर्ववंद्यतांगतेसर्थ: ॥ ३२ ॥ अनिवार्य
मिति विधुश्चंद्र: अनुरागंरक्ता आवरणेनरागेणावर्णमगत: अप्राप्तोपिगगनस्थित: आकाशस्थ: ।
सन् सर्वत्रपर्यटन्नपियत्तम: अपोहितुंनिवारयितुं नक्षम: नसमर्थ: पर्याप्तिवचनेष्वलमर्थेष्विति तुमुन्
अनिवार्यमनाद्यविद्यासंपर्कसंभूतत्वादन्येननिवारयितुमशक्यम् निविडंसांद्रम् तत्तमोजनहृद्गताज्ञाना
त्मकम् अंगुले: रुचाकांत्यानुरंजितस्वसावर्ण्यमापादित: यस्यचरणस्यनखै: निरास्यतिनिवर्त्तयति ॥ ३५

॥८॥

शुभलक्ष्मेतियत्रयस्मिन्पादेशुभलक्ष्ममंगलचिह्नात्मकंम् कुलिशंवज्रमुरुकुमारंकोमलमपिकृत
रांदूरंविप्रकृष्टदेशंगच्छतिप्राप्नोतीतितथाभूतंसत् अनवद्यरूपानिप्रच्छन्नचौरत्वादनवलोकनीयानिभ
क्तजनकामादिदोषरूपाणिलक्ष्याणिशरव्याणिभिनत्तिछिनत्तीतितथोक्तम् स्मरणंसद्ध्यानंईक्षणं
सद्दर्शनंचकुर्वंतीतितथाभूतायेजसृधारिणः प्राणभृतोजनास्तेषांमानसस्थितानिमनोगतानियानि
किल्बिषाणिभक्तिविरोधीनिपापानिकवरुपक्षुरागमोहादीनिपापानितान्येवक्षितिधरःपर्वतस्तस्यावदा

शुभलक्ष्मयत्रकुलिशंसुदूरगंसुकुमारमप्यनवद्यरूपलक्ष्यभित् ॥ स्मरणेक्षणाद्दसृधारिमानसस्थितकि
ल्बिषक्षितिधरावदारणम् ॥२५॥ शालिलक्ष्मयत्रजनतात्मदंतिनः समदस्यनिग्रहमदद्यरूपमीयुषः ॥ वरूथाव
लेयमपिचापलक्ष्मणंविदधातिसूनशरमाशुनिर्मदम् ॥२६॥ रणमामूलतोभेदनंचास्ति ॥२५॥ शालिलक्ष्मे
तियत्रयस्मिन्पादेशालिरंकुशः शालिरंकुशवाची वकारान्तःशब्दस्तृणवाचकइतिशब्दभेदः सएवलक्ष्मचिह्नम्
मदेनगर्वेणसहितेब्रह्मादीनामप्यजेयत्वात्कृर्विशिष्टमित्यर्थः हस्तिपक्षेमदोदानम् अदद्यरूपंरूढ़ीनिगूढत्वम् ई
युषःप्राप्तवतः जनतानांजनसमूहानामात्मनोमनांस्येवदंतीगजस्तस्यनिग्रहंवशीकरणम् आशुशीघ्रम् वि ॥८॥

दधातिकरोतीतियत्रचपादेचापंधनुस्तदेवलक्ष्मणंचिह्नम् वरूथोतिविपुलोः बलेपोयस्यतंतथोक्तमपिसूनशा
रंपुष्पबाणंकामम् आशुनिर्मदंगतमदम् विदधातियदितदंकानांमहिमापीयतयावर्णयितुंनशक्यतेतर्हिद
र्शनमहिमेयन्तयातुनुवर्णनेतेतत्रकिमुक्तेतिभावः ॥२६॥ मृदुपल्लवइतिमृदुःकोमलःयःपल्लवःप्रवालःत
स्यसहजानंदस्यसंबंधिनोयेजंघेपस्तेतयोःतुलनामुपमाम्नयमानयोनप्रापह्नियस्मात्सःपल्लवःतेनसह
जानंदेनपदस्पुरणास्पलवः शोभालेशास्तेस्यभावस्तत्तातयापिअवधीरितस्तिरस्कृतः शुभंमंगलकरम् जानु

मृदुपल्लवोपिनतदीयजंघयोः सहितेनपल्लवतयावधीरितः ॥ तुलनांचजानुयुगलंययोःशुभंविमलेंदुनीलमु
कुराववतर्जनम् ॥२७॥ अपिकुम्भसक्थियुगलेसमीरितामृदुतावितर्जितसुमसमसौचिता ॥ नहितस्यदंतिपति
हस्ततुल्यताकविभिःसुकर्कशविहुषणत्वतः ॥२८॥ नोरुरूपर्वणोर्युगलम् विमलाविशुद्धायेइंदुनीलाःरूप
ममणयस्तेषांमुकुरेदर्पणेतयोरवतर्जनंभर्त्सनंभवतीतिशेषः ॥२७॥ अपीतितस्यसहजानंदस्यकम्रमणी
यंयत्सक्थ्नोरूर्वोर्युगलंतस्मिन् कविभिः काव्यकर्तृभिर्विदग्धैःदंतिनोगजास्तेषांपतिरधिपस्तस्यहस्तः
शुंडादंडस्तस्यतुल्यतासादृश्यमसमीरितासम्यगुक्तापिसातत्तुल्यतासुकर्कशत्वेनिकविनत्वात्वमेवविद्दूष

हरिसं० ॥९॥

एवं लांछनं न स्वभावस्तत्त्वं तस्मादिति नितंतोऽहेनो: मृदुनः कोमलस्य भावस्तत्त्वात्तया वितर्जितनमद्भक्तिर्नितंस्कंभं पुष्पं यं सर्ग १३
नत तत्तथोक्तस्य पुष्पाद्यपि कोमलस्येत्यर्थ: तस्य सक्थियुगलस्य न हि कृचितानेव योग्या ॥ २८ ॥ अवलोक्येति ॥ अद
भ्रं बहुलं यथा भवति तथा भासितुं वाभितुं शीलमस्यास्तां तथोक्ताम् मुष्टिज्ञातो लग्निस्तान्छलीन्मेदिति लग्नि: प्र
सप: यस्य सहजानंदस्य कटिं श्रोणिम् अवलोक्य दृष्ट्वा हरि: सिंह: उरुलज्जयेव तत्कटिन्यायेनस्वकटि
श्रीयणभूतत्वाद्वहुदिये वेसुलेक्षादवीय: अतिन्यायेन दूरम् द्विवचने सादिनेय फनु स्थूलहृस्वयुवकस्य क्षिप्रक्षुद्र

अवलोक्य यत्कटिमदभ्रभासिनीं विपिनं द्रवीयदुरुलज्जया हरि: ॥ गतवानिव प्रकृतिरस्तिमानिन: सपरो
दयं विषहते न सा यया ॥ २९ ॥ एवं यदपि यरं पूर्वस्य च गुण इति सूत्रेण इकरस्य घणादिपरलोपेन कारलोप:
पूर्वस्य च गुण: अवादेशश्च विपिनं काननम् ॥ गतवान् प्राप्तवान् ॥ ननु सर्वजनाक्रांतिमात्मत्कटया दर्शनेन
सिंहस्य लज्जाप्तिहेतुत्वाभावेपि तत्प्राप्ता चहंकारिणस्तां हृत्वा स्वप्रकृतिरेव हेतुरित्यर्थोंतरन्यासेनाह मानो
हंकारोस्यास्तीति तथोक्तस्तस्य जनस्य सा प्रकृति: स्वभावोस्ति यया प्रकृत्या समानी जन: परेषामन्येषामुद
यमुत्कर्षम् न विषहते न विमृष्यते ॥ ३० ॥ स्वेति तस्य सहजानंदस्य संबंधिनि फनुं तुंदे कृष्टुदरे त्रयोत्तयवा अस्मा ॥९॥

सात्रयी संख्याया अवयवेत्तयविति त्रिशब्दात्तयप् टिड्डाणञ्द्वयसादिना डीप् वुली नीजतरावयवानां त्रयी वलित्र
यी रुचिरस्तरान् अतिकमनीया चासौ वलित्रयी च सा तथोक्ता अस्मिन् सहजानंदे निरतो गाढानुरागी योजन: भक्त
वर्गस्तस्य सत् विषयरागाभावात्सन्मस्तं यन्मनस्तदेव करेणुर्हस्तिनी तस्य सुललितमतिसुंदरं यन्नाभिरेव सरस्तडा
गस्तस्मिन् प्रवेशनाय भंगयो विच्छित्तयो विरूते अपाता तथोक्ता स्मृति: पंथा इव बभौ राज ॥ ३० ॥ नभसीति ॥ कलि
तं धृतं स्फुमौक्तिकानां श्रेष्ठमुक्ताफलानां दाम हारो येन सितस्ततथोक्तम् वनधरो जलभृन्मेघस्तद्वद्रुचिरस्कंदसम्

स्वनिरतजनसन्मन: करेणो: स्खलितनाभिसर: प्रवेशनाय ॥ रुचिरत्रवलित्रयी तदीयेसृतिरिवभंगिमतीव
भौ कतुंदे ॥ ३० ॥ नभसि प्रथयगुभौय दिप्रवाहो गगननदीपयस: समापतेताम् ॥ वनधररुचिरं बदानुकुर्यो कल
लितस्कमौक्तिकदामयस्यवक्ष: ॥ ३१ ॥ यस्य सहजानंदस्य वक्ष उर: कर्म गगननद्या आकाशगंगाया: पयो बुत
स्तस्य प्रवाहो नभसि व्योमनि प्रथक् समायतेतां यदि प्रवहे तां चेत् संभावनायां लिङ् तदा अहं अनुकुर्यो मु
पमेयं विदध्याम् नास्योपमानं किंचिदिति भाव: अत्र व्योमनि गंगाप्रवाह द्वयासंबंधेपि संभावनया संबंधकथ
नादतिशयोक्ति: तदेतत्पुष्पं प्रवालोपहितं पदितस्यादि साद्युदात्तसालंकार: सर्वस्वकार: स्पष्टी चकार ॥ ३१ ॥

हरिसं॰ सिततरेति सिततरा अतिविशदा याः गुलिका मौक्तिकानि ताः प्रचुरा यस्मिंस्तत्तथोक्तम् तस्य कृतत्वचने मयट् इति सर्ग॰१३
॥१०॥ प्राचुर्ये मयट् ललामं कंदरम् धृतं कटं नानि बद्धं वरं श्रेष्ठं च यत् सारसनं शृंखलं तेनावलंबते आश्रयते इति तत्तथो
क्तम् आप्रपदीनं पादस्याग्रं प्रपदं तन्मर्यादीकृत्य प्राप्नोतीति तत्तथोक्तम् आप्रपदं प्राप्नोतीति खप्रत्ययः आयु
र्नेयीनीयियः इत्यादिना इनादेशः अस्य सहजानंदस्य दाम हारः हरेर्वामनस्य पच्चरणं तेन विसृष्टं स्यक्तम् ऊर्द्ध्वमूर्द्ध्व
प्रवाहस्य सरितो गंगाया अंभो जलमिव रेजे इव भाविसुस्त्रेक्षा ॥२२॥ अरुणेति अतिपेलवा अतिकोमला मंजु

सिततरगुलिकामयं ललामं धृतवरसारसनावलंबि दाम ॥ हरिचरणविसृष्टमूर्द्ध्वमंभः सरिदिव आप्रपदीनमस्य
रेजे ॥२२॥ अरुणनखमणिप्रभं तदीयं लसदतिपेलवमंजुलांगुलीभिः ॥ करयुगमवधीरयांबभूवे स्थलनलि
नं हलसंश्रितमलीकम् ॥२३॥
लाः कमनीयाश्च या अंगुल्यस्ताभिः लसच्छोभमानम् अरुणाः रक्तवर्णा ये
नखा एव मणयस्तेषां प्रभा कांतिर्यस्मिंस्तत्तथोक्तम् हलानि विनानि श्रितानि संश्रितानामाश्रितानां अलीकानि
त्रिविधदुःखानि येन तत्तथोक्तम् तस्य सहजानंदस्य संबंधि करयोः पाण्योर्युगं युगमम् स्थलनलिनं स्थलपद्मम्
कर्म अवधीरयांबभूवेति तिरस्कृतं स्थलपद्मादप्यधिकमृदुत्वरक्तत्वगुणवत्त्वादस्य पाणिद्वयमभूदित्यर्थः बाकुल्य ॥१०॥

कोपान्ता च्छोरादिकात् अवधीरयते कर्त्तरि लिट् ॥२३॥ उदियायेति वरः श्रेष्ठो योदरः शंखस्तस्मात् वरदरत्वेनाध्य
स्तात् श्रीहरिकंठात् इति रूपकातिशयोक्तिः नीरधरो जलभृन्मेघस्तस्य धीरो गंभीरो यः स्वरः मधुरालापरूपनीर
धरस्वरस्तत्रापि रूपकातिशयोक्तिः उदियाय उदेत् इति महदद्भुतम् अभवत् घोरसंरवकारणस्य शंखस्य मधु
रालापकारणत्वमिति साश्चर्यं तत्राप्यस्मदीयकार्यकर्तृत्वमिति महत्त्वम् कंबुशंखयोः शंखकारणत्वेन साद्रूप्य
म् विभावनालंकारोयम् एतच्च कदाचित्तत्र सदसि श्रीहरेर्गायद्भिः सद्भिः सह गायति सतीति ज्ञेयम् यस्य श्रीहरे

उदियाय नीरधरधीरसंरवो महदद्भुतं वरदरात्पुर्भृताम् ॥ अभवत्समूह इव चित्रनिर्मितः श्रवणेन यस्य निभृतः
सुविस्मितः ॥२४॥ तनुसमरदकुंदपंक्तिरम्यं स्मितविलसन्नवविद्रुमारुणोष्ठम् ॥ रुचिकरमवलोक्य यस्य वक्त्रं
नवकुतुकविस्मयमेति कस्त्रिलोक्याम् ॥२५॥
कंठरवस्य श्रवणेन शुश्रूषया विस्मितः आश्चर्यं गतः वपुर्भृतां
देहिनाम् समूहः कलापः चित्रनिर्मितः आलेख्यबिंबस्त इव निभृतः स्थिरः अभवदिति सतुषंगः ॥२४॥ तन्विति
तनवः सूक्ष्माः समाः कृशदीर्घादिभाववर्जितत्वात् तुल्याश्च ये रदा दंतास्त एव कुंदा माघमासोद्भवाः कुंदकलिका
स्तेषां पंक्तिरावलिस्तया रम्यं रमणीयं मृ स्मितेन ईषद्धास्येन विलसच्छोभमानम् नवानवीनाये विद्रुमाः प्रवालास्तद्व

दरूणेनोणावोष्टावधरो यस्मिंस्तत्तथोक्तम् रुचिकरं कंदरम् यस्य सहजानंदस्य वक्त्रं मुखम् अवलोक्यनि
रीक्ष्य त्रिलोक्यां त्रिभुवने को जनः वक्रुल विस्मयमसाश्चर्यं नैति न प्राप्नोति सर्वोपि प्राप्नोत्येवेत्यर्थः ॥ नृ५ ॥ सरसि
जमिति मनोज्ञं मंजुलाये केशाः शिरोरुहास्तैरुपलक्षिता तस्य सहजानंदस्य यन्मुखं तस्य श्रीः शोभा अवलग्ना
निलीना निभृंगाणाम् अलीनां वृंदानि समूहा यस्मिंस्तत्तथोक्तम् सरसिजं कमलम् जलधरा मेघास्तेषां पंक्तिरा
वलिस्तया युतं सहितम् विधुमपि चंद्रं च अपि शब्दार्थे गर्हा समुच्चय प्रश्न शंका संभावनास्वपि स्मरः परिभूय अ

सरसिजमवलग्नभृंगवृंदं जलधरपंक्तियुतं मनोज्ञकेशैः ॥ विधुमपि परिभूय तन्मुखश्रीर्भृशाममलुनात्समता
कथाप्रसंगम् ॥ नृ६ ॥ कुटिलविकुरसेवितं यदीयं भ्रमरकुलाकुलमीक्षितं मुनींद्रैः ॥ शाकुलयुगलसंश्रितं सरोजं
वदनमधिक्षिपदीक्षणीयनेत्रम् ॥ नृ७ ॥
वृत्तान्यसमता कथाप्रसंगं साहत्रपवाज्ञात्र प्रसिद्धमपि भृशामसंतम्
अलुनादछिनत् प्रसन्नयोरंबुजचंद्रमसोः परिभूतत्वादितरत्र साम्यसंगादित्यर्थः अत्र पादत्रयस्य साम्यरूपक
थाछिदं प्रतिहेतुत्वेनोपमासात्काव्यलिंगमलंकारः ॥ नृ८ ॥ भंग्यंतरेण तदेवाह कुटिलेति कुटिलाभुग्नायेचि
कुराः केशास्तैः सेवितं जुष्टम् मुनींद्रैर्योगींद्रैः ईक्षितं दर्शनविषयीकृतम् ईक्षितुं द्रष्टुमर्हे नेत्रे नयने यस्मिंस्त ॥११॥

त्तथोक्तम् यस्य सहजानंदस्य संबंधि वदनं मुखम् भ्रमराणां भृंगाणां कुलानि यूथानि तैराकुलं व्याप्तम् शाकु
लयोर्मीनयोर्युगलं तेन संश्रितं मिश्रितं च सरोजं पद्मम् अधिक्षिपत्तिरस्कुर्वत् सत् अवनतेति विशेषः ॥ नृ९ ॥
कमलमिति अतिचपला चंचलतरा श्रीः कांतभिमानिनी देवता कमलं पद्मम् उपगता आश्रिता सती चंद्रली
लां विधुशोभाम् न भुंक्ते नानुभवति विधुं चंद्रम् आश्रिता सती नलिनस्य पद्मस्य गुणान् सौगंध्यादीन् न भुंक्ते
यस्य सहजानंदस्य मुखमाननम् अधिगम्य प्राप्येति पदद्वयं तु उभौ पद्मचंद्रावाश्रयः कारणं यस्यास्तां तथोक्ताम्

कमलमुपगता न चंद्रलीलां नलिनगुणान् विधुमाश्रिता न भुंक्ते ॥ रतिमतिचपलोभयाश्रयां श्रीर्मुखमधिगम्य ज
गाम नाम यस्य ॥ नृ९ ॥ जलजमपि जितं हरेर्वयस्य मितहसितेन जिता विधोरभिख्या ॥ न सदृतिकृतमाननोपमानं
जगति विनिर्जितकंदर्पं न रेऽस्ति ॥ नृ१० ॥
रतिं प्रीतिं मुंजगाम लेभे नाम निश्चितम् तत्र गुणद्वयानामत्वाद्विनिभावः
ननू भाकुदान्तो निसमिति मूत्रेसंस्थायाम् अयपवेनय विति सूत्रादवयवेतय विसनुवर्त्तनाद्वात्राययाचार्थला
भस्तत्रैवो भन्नाद्वाष्टिहितस्पतययो । यज्ञादेशः फलभोनतु द्वन्द्वविषयइति चेन्न तत्र सूत्रे निसमिति योगविभा
गात्तत्रापि तस्य फलभत्वात् अत एव कालिदासोपि प्रायुंक्त उभयपक्षविनीतनिद्रः इति अत्रोपमानभूतपद्मचंद्र

पेक्षयोपमेयस्य श्रीहरिमुखस्याधिकगुणत्वोक्त्या व्यतिरेकालंकारः तदुक्तम् भेदप्राधान्ये उपमानादुपमेय
स्याधिक्ये विपर्यये वा व्यतिरेक इति ॥ ७८ ॥ तल्लजमिति यस्य सहजानंदमुखस्य हृत्तानेत्रेणैव तल्लजं पद्मं जितं पर
भूतम् मिलत् हसितेन मंदहास्येन विधोश्चंद्रस्यापि अभिरमात्रं आभा अभिरमानामत्रं आभयोरित्यमरः जितापरा
भूता उभयत्रापि पद्मचंद्रयोर्भ्रांती भातिर्नाप्यादिति भावः अतएव विनिर्जितानि तन्मुखेन पराभूतानि स्फुंदसंतत
तिपद्मचंद्रादि तिरस्कृरमणीयवस्तूनि यस्य तथाभूते जगति विश्वस्मिन् तस्य सहजानंदस्य अतिस्फुरमप्रतिस्फुंद

यदि सितकुसुमं प्रवालसंस्थं सदरुणविद्रुमपाति मौक्तिकं स्यात् ॥ स्फुरदविरदहसितं तदानि तस्याधरपतितद्युति
यस्य वानुकुर्याम् ॥ ७७ ॥ रुंध्यदाननं मुखं तस्योपमानमुपमीयते साहृत्पतया निरूप्यते अनेन तथाभूतं वस्तु ना
स्ति करणाधिकरणयोश्चेति करणे ल्युट् ॥ ७८ ॥ यदीति सितकुसुमं धवलपुष्पम् प्रवालसंस्थं नवपल्लवोपहि
तं स्यात् प्रवालो वल्लकीदंडे विद्रुमे नवपल्लवे इति विश्वः मौक्तिकं मुक्ताफलं वा सत् प्रत्यग्रास्तमरुणं शोणं च य
द्विद्रुमं प्रवालस्तस्मिन् पतति तिष्ठतीति तथाभूतं स्याद्यदि तदा अतिरक्तो तिशोणो योधरोधस्तनोष्ठस्तस्मि
न् पतिता स्थिता द्युतिः कांतिर्यस्य तत्तथोक्तम् यस्य सहजानंदस्य स्फुटं विशदं शुभ्रं हसितं हास्यम् अनुकुर्यात् ॥ १३ ॥

पमेयं विदधामीत्यर्थः अत्र कुसुमप्रवालयोर्मौक्तिकविद्रुमयोश्चासंबंधेपि संबंधातिशयोक्तिः सा च संभाव
नयेत्यलंकारसर्वस्वकारः विशेषस्तु कुसुममौक्तिकयोरुपमानयोः स्फुटत्वोत्कर्षार्थमुपमेयताकल्पनात्प्रतीया
लंकारः स च पूर्वोक्तातिशयोक्त्यनुप्राणित इति उपमानस्य पक्षे उपमेयतो कल्पने प्रतीयमिति लक्षणम् ॥ ८० ॥
अधराविति सततं निरंतरम् नयनानां प्रेक्षकजननेत्राणां निर्वृतिं सुखं प्रददतौ यद्यतद् इति तौ तथोक्तौ हरेः सह
जानंदस्य अधरौ ओष्ठौ स्फुनागवल्लिकावरतांबूलवल्ली तस्या दलानि पत्राणि तेषां चर्वणात् ऋतेपि भक्षणं विना ॥

अधरौ हरेरपि स्फुनागवल्लिकादलचर्वणादरुणिमानमूहतुः ॥ स्फुतरसामृतेन नयननिर्वृतिप्रदौ न हि रूप्यमर्पितमपे
क्षते गुणम् ॥ ८१ ॥ अवलोक्य यस्य करकोद्भवं फलं समसूक्ष्ममंजुलतरद्विजावलिम् ॥ त्रपयेव तिष्ठति सदा स वा
द्भुतं भजन्नेन कोप्यविजितो न तास्यताम् ॥ ८२ ॥
पि अरुणिमानम् अरुणस्य शोणस्य भावस्तं तथोक्तम् पृथ्वादि
भ्य इमनिज्वेति सूत्रेण प्रत्यग्राद्व्यादिम निवृदेरिति टिलोपः ऊहतुर्दधतुरित्यर्थः अत्र दलं सुधाखदिरपूगादिसंयुक्तं
ग्राह्यम् अन्यथा तद्दानासंभवात् तथा हि रूप्यं रमणीयं स्वभावसुंदरमिति यावत् वस्तु इति शेषः कर्तृ अर्पितं वस्त्वं
तरेणाहितम् गुणं नापेक्षते इति निश्चितम् तत्र स्वभावस्यैव समर्थत्वादिति भावः अत्रार्थांतरन्यासः ॥ ८१ ॥ अवलो

हरिसं· सर्ग·१३

॥२८॥ क्वेति करकोदाडिमवृक्षः समो करकदाडिमावित्यमरः तस्माद्वृत्तवदसन्निर्यस्तत्तथोक्तम् फलम् यस्य स
हजानंदस्य समास्फलमाः सूक्ष्मास्तनवश्च मंजुलतरा अतिस्फंदराश्च ये द्विजा दंतास्तेषामावलिः पंक्तिस्तां त
थोक्ताम् अवलोक्य निरीक्ष्य त्रपया स्वबीजत्रेणापरणभवज्जमयालज्जयेनेसुस्त्रेक्षा सदा सततम् अस्य वा
ङ्मुखप्रतीवाधोवक्त्रं यथा स्यात्तथा तिष्ठतीति तथाहि अनेन परेण विजितः पराभूतः कोऽजनः न तं नम्रीभूत
मास्यं स्फुरवं यस्य तस्य भावस्तत्ता ताम् न भजतेत्से सर्वोपि न भजत एवेत्यर्थः ॥४२॥ हसनेनेति हसनेन प्रसारिणी प्र

हसनप्रसारिरदनोज्ज्वलत्विषाच्छुरितं स्म भाति वरगंडमंडलम् ॥ स्फटिके
रिवास्य परिभिन्नमुज्ज्वलेरसितोपलस्थलमदभ्रभास्वरम् ॥४३॥ ॥

सरणशीलया रदनानां दंतानां मुज्ज्वलाद्देदीप्यमानात्त्विट्कांतिस्तया च्छुरितं व्याप्तम् अस्य सहजानंदस्य व
रोष्ठे योगंडोगंडद्वयस्थलं तत्पोर्मडलं प्रदेशाः उज्ज्वलैर्देदीप्यमानैः स्फटिकैः शुभ्रमणिभिः परिभिन्नं मिश्रि
तम् अदभ्रं बहुलं यथा स्यात्तथा भास्वितुं शीलमस्येति तत्तथोक्तम् स्थेन्नाभासपिसकसोनरजितिभासतेर्व
रत् असिताः कृष्णा मायेत्रपलामणायस्तेषां स्थलं तत्रिवद्धभूप्रदेशोद्वभाति स्म रराजा ॥४३॥ ॥ ॥२८॥

प्रचलदिति प्रचलती अति चंचले विचित्रानीलपीतायनेकवर्णा प्रणायो ययोस्ते विचित्रमणिनी च ये कुंडले तयोः प्र
भा कांतिस्तया विलसच्छोभमानं यत्कपोलयोर्युगलं तेन कर्त्रा विविधैर्विचित्रैः धातुभिर्गैरिकादिभिः करणैः परभागगु
णोत्कर्षमर्द्धमुपः प्राप्तवत सिताः शुभ्राः शुभ्रमणयस्ते भूतैत्तरे अप्रमेणप्रापाद् इत्यर्थः तथा भूता ये मणयस्ते व्याक्ष्माभूतः
पर्वतस्य द्युतिः कांतिः अलंकारिम् अनुसृतेत्यर्थः कर्मणि लुङ् पूर्णोपमेयम् ॥४४॥ समतामिति शुकचंचुः कीरत्रोटि
सुवेत्सी ततया प्रतिवक्रतया हेतुना आविद्धकुटिलं भुग्नं वेल्लितं वक्रमित्यमरः अस्य सहजानंदस्य नासया समतां

प्रचलद्विचित्रमणिकुंडलप्रभाविलसत्कपोलयुगलेन धातुभिः ॥ विविधैः सितेतरमणिक्ष्माभृतो द्युतिरलंकारि पर
भागपीयु ॥४४॥ समतां न दीपकलिकापि नासया शुकचंचुरेति वक्रलोहमवल्लया ॥ अभवत्कवेल्लिततयेव नाकुली
वक्रसंभ्रमा श्रुतिमवेक्ष्य चंचुला ॥४५॥ नासिकायातुल्यतामित्यर्थः तुल्यार्थैरतुलोपमाभ्यामित्यादिना तुल्यार्थयो
गेया क्षिकी षष्ठ्यपवादत्वयात्तृतीया विहितानेति न प्राप्नोति दीपकलिकादीपशिखा वक्रलं विपुलं पद्मगता यस्य
दस्य स्पाः सा वक्रलोहमवती तस्या भावस्तत्ता तत्वयोर्गुणवचनस्येति पुंवद्भावः तस्या हेतुभूतया समतां नैति इ नाकु
लीकर्णवेष्टनम् श्रुतिं कर्णम् अवेक्ष्य निरीक्ष्य वक्रलसंभ्रमा अतित्वरावती सती कुंचलात् अभवदित्युत्प्रेक्षा ॥४५

अभिद्रूपेति लोकान्तनास्तेषां विजयो विशेषेण पराभवस्तेनातनुर्महान् विस्मयो गर्वो यस्य सः तथोक्तः रतीशिता
रतिपतिः कामः असरालाकुटिलातरला च चलासा चासौ सा च तां तथोक्तामसितेतरां नृपामास्पर्द्धेः ललितामुदग्र
म् अस्य सहजानंदस्य भ्रुवं भ्रुकुटिम् अभिद्रूपविलोक्य स्वस्यात्मनः शरासनं धनुस्तस्यातिकमनीयतातिसुंदरतात
स्याभवोजन्म यस्य तं तथोक्तम् दर्पं गर्वम् अजहात् तत्याज ॥ ५६ ॥ समेति वरस्य कुंकुमस्य रक्तो वर्तुलः चारुतरो रमणी
यतरो मध्ये पुंड्रांतराले चंद्रकः बिंदुर्यस्मिंस्तं तथोक्तम् नरश्रेष्ठं यत्केसरं तस्य ऊर्ध्वं चित्रकं तिलकम् अदधत् आपतं दीर्घ

अभिद्रूपलोकविजयातनुस्मयो ललितामरालतरलां सितेतराम् ॥ स्वशरासनातिकमनीयताभवं भ्रुवमस्य दर्पमज
हाद्रतीशिता ॥ ५६ ॥ वरकुंकुमचारुतरमध्यचंद्रकं दधदूर्ध्वमायतविशालमंचितम् ॥ अलिकं करेश्वरधनुःश्रियं हरेर्वर
केसरस्य भजते स्म चित्रकम् ॥ ५७ ॥ विशालं विस्तीर्णम् उन्नतन्तत्रयद्यपि पदद्वयस्य विशेषणत्वाद्विशेषणं विशेष्ये
णवक्तव्यमिति समासाप्राप्तिस्तथापि विशेषणविशेष्ययोः कामचारानुज्ञानाद् अमतरस्य विशेष्यत्वं प्रकल्प्य समा
सो विधेयः अंचितं सुंदरं महापुरुषैः पूजितं वेत्यर्थः हरेः सहजानंदस्य अलिकं भालम् करेश्वरस्य देवेंद्रस्य धनुश्चा
पं तस्य श्रियं शोभाम् भजते स्म विविचित्रवर्णमिंद्रधनुर्यथा तथा कुंकुमकेसरद्रवनिर्मितं तत्सोर्ध्वपुंड्रतिलकविशिष्ट

इत्थं तदंगश्रियं वर्णयित्वेदानीं तस्मिन् जनानां प्रेमातिशयमाह अतिसक्तिमिति गुणानां सत्यशौचादीनां धा
म्नि आस्पदे इत्थंगश्रियं दधती तिशेषः तत्र तस्मिन् सहजानंदे जनानां तमीक्षमाणानां जीवानां यानि नेत्राणि च
क्षूंषि तेषां संचयः समूहः सुरभीणि सुगंधीनि यानि प्रसूनानि पुष्पाणि तेषां निचयाः कलापास्तैः अन्वितेयु
क्ते द्रुमे वृक्षे मधुपानां भ्रमराणाम् आकरः समूह इव नवाः नवीनाः पल्लवाः प्रवाला यस्मिंस्तथाभूतोय आम्रः
सहकारवृक्षस्तस्मिन् कोकिलानां परभृतानां व्रजो वृंदमिव अतिसक्तिम् अतिस्नेहम् ॥ आपतुपलेभे ॥ ५८ ॥

अतिसक्तिमापजननेत्रसंचयो गुणधाम्नि तत्र मधुपाकरो द्रुमे ॥ सुरभिप्रसूननिचयैरिवान्विते
नवपल्लवाम्र इव कोकिलव्रजः ॥ ५८ ॥ प्रससार तस्य रमणीयतास्पदं श्रितमानसं रुचिरचंक्रमं प्रभोः
चरणद्वयं वलिविराजितोदरं परिणाहवद्धृदयं गलं मुखम् ॥ ५९ ॥ प्रससारेति श्रिताभक्तजनास्तेषां

मानसं यस्य प्रभोः क्षराक्षरनियमनसमर्थस्य तस्य सहजानंदस्य रमणीयतास्पदं सर्वे सुंदरतास्थानमुरुविस्तारा
श्चंक्रमः शीघ्रगामनं यस्य तत्तथोक्तम् चरणद्वयम् कर्मभूतं प्रससार प्राप वलिभिस्त्रिभिर्विराजते वापद्वैर्विराजितं शोभ
मानमुदरं तुंदम् प्रससार परिणाहो विशालता विद्यते ऽस्य तथाभूतं हृदयम् गलं कंठम् मुखं च प्रससार ॥ ५९ ॥

युष्पेनाह अवलोकयंतमिति अखिलाः समग्रा ये कैतुकामाकुः रवानिताानि छिनत्ति भिनत्तीति तेन तथोक्तेन
चले चंचले चारु कंदर्प तारके कनीनिके ययोः स्तेमनोज्ञा निरुचिराणि पक्ष्माणि नेत्रलोमानि ययोस्ते तेचले ते
च तयोस्तथोक्तयोः नेत्रयोः अतिमंजुलेनातिकंदर्पेण युगलेन मुहुः पुनः पुनः आत्मनः स्वानु पुरुतरानुकं
पया वक्रतरकृपया अवलोकयंतं परिपन्नं पं तम् तं सहजानंदम् जना भक्तजनाः त्रिति किं वा मयूराः चातकाः



अवलोक्य तमखिलक्रमछिदमुरुरात्मनः पुरुतरानुकंपया। चलचारुतारकमनोज्ञपक्ष्मणोरतिमंजुलेनयुग
लेननेत्रयोः ॥५०॥ रभसं तनास्तमवलोक्य निर्भरं त्रिति किं च चातकगणा इवांबुदम्। रमणीयनेत्रावधिमिवातिदुर्गता
विधुमागमन्निवचकोरपत्त्रिणः ॥५१॥ पुरुधौ कुमार्यकरवमल्पसंयुतं यमवेक्ष्यवीक्षणमहप्रदं ययोः। वक्रलज्जये
वतनुभृन्मनोहरी परिलीनतामपदिमीनकेतनः ॥५२॥ मयूरगाश्चूदावीधाटोद्यसारंगः स्तोककस्तातकः समाहृस
प्रः तेषां गणाः समूहाः अंबुदं मेघमिव चकोरपत्त्रिणः विधुं चंद्रमिव अतिदुर्गता अलिदरिद्रा जनाः रमणीयनेत्रावधि
मिव रमणीयः सुंदरश्चेय रोरुधिः रोते जनोः नेनेति निधिं त्वं मुखम् धनत्रीिध्यांवन्नितिवनुत्रावधीयते अस्मिन्नसत तथोक्तः नि
धिरिसर्थः कर्मण्यधिकरणे चेति किः अवलोक्य निरीक्ष्य निर्भरमतिशयम् रभसं हर्षम् आगमन् प्रापु ॥५०॥५१॥ पु



र्विति मीनो मकरः केतनं ध्वजो यस्य सः कामः इसर्थः पुरुवक्रलं यत् सो कुमार्यं मृदुत्वं करवमल्पमतिसौंदर्यं च
ताभ्यां संयुतं सहितम् वीक्षणानां नेत्राणां महमुत्सवं प्रददातीति तं तथोक्तम् यं सहजानंदम् अवेक्ष्य दृष्ट्वा वक्र
लज्जया तत्करसौंदर्यातिशयेन स्वनारी रत्नेन भातिरोधानत्वमधुरुक्तिषि वेसुत्प्रेक्षास्पदिनी घ्रम् तनुभृतां दे
हिनां मानिमनांसि ताम्येव दर्य स्ताम्य परिलीनतां तिरोधानताम् ययौ प्राप ॥५२॥ संप्रतितत्रूपस्यानवधिकता
तिशयत्वं द्योतयन्निगमयति हरीति हरेः सहजानंदस्य परतरमतिश्रेष्ठं यद्रूपं नारीरसौंदर्यं तदेवांभोधिः सा

श्रीहरि॰

हरिपरतररूपांभोधिकल्लोललीलाततिमहिपतिरीशोनास्य हेतत्रमंदः ॥ किमुगदितुमशेषं वर्णयन्नप्यजः
स्त्वघनरसभवजन्मात्रारदाम्नायवारः ॥५३॥ गरस्तस्य कल्लोला महातरंगास्तेषां लीला नुशोभा नस्यास्तति र्वि
स्तारस्ताम् अहिपतिः शेषः सहस्रवदनोपि अजस्रं सततम् वर्णयन्निरूपयन्नपि अन्तं शेषं नास्तिशेषो वेत्ति
योयस्मिन्कर्मणि तद्यथात थासमग्रमित्यर्थः गदितुं वक्तुम् ईश्वरः समर्थः नास्ति तथा आम्नायवारो वेदस
मूहः वेदचतुष्टयमितियावत् तन्निकटचर्तनोपि गदितुं शेषेणास्ति तथा घनरसोज्वलं तस्माद्ब्रह्मबीजनि
र्यस्य तत्समग्रमित्यर्थः तस्मात्तन्मो सत्रिर्यस्य सब्रह्मेत्यर्थः मुकुर्वेदार्थपरिज्ञानैरलोपि गदितुं नास्तीश्वरः

शारदासरस्वती सर्ववस्तुनिरूपणादिसमर्थापि गदितुंनास्तीत्याह इतिलिंगविपरिणामेनयोज्यं तत्र तस्
स्मिन् निःशेषतच्छरीरसौंदर्यातिशयवर्णने मंदोल्पमतिः अहं श्रीमद्दविंसानंदवर्णीनामाकविः ईदृशोनास्ति
तत्र किमुक्तिंवक्तव्यम् मालिनीवृत्तमेतत् ननमयययुतेयं मालिनी भोगिलोकैरितितल्लक्षणात् ॥ ५३ ॥



इतिश्री हरिसंभवे महाकाव्ये हर्यंके कविश्रीमद्दविंसानंदवर्णिकृते तन्नेपथ्यादिवर्णननामा द्वादशः सर्गः
१२ ॥

इतिश्री पदवाक्यप्रमाणपारावारीणधुरीणविश्वनाथभट्टात्मजदीनानाथभट्टशिष्यश्रीब्रह्मक्षवासुदेवस्वामि
सहजानंदस्वामिचरणकमलोपासकगोपालानंदसुमंतःप्रेरितमतिव्यासावटंकदयाशंकरात्मजश्री हरिकृ
ष्णैकभक्तभोलानाथकृतौ श्रीहरिसंभवकाव्यसविद्वज्जनाह्लादिन्याख्यव्याख्यायां द्वादशःसर्गः ॥ १२ ॥

लि॰ एकलजेगामोराजी म॰ १९५६ फागणशुदी १